2026

Sanskrit Sahitya

MASSC401

संस्कृतनाट्यतत्त्वम्

Full Marks : 80

Time : 3 hours

(The figures in the margin indicate full marks for the questions)

अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम् – 1×10=10

1. नाट्यशास्त्रस्य प्रथमाध्यायस्य नाम किमस्ति ?
2. ब्रह्मा कस्मात् वेदात् रसं गृहीतवान् ?
3. इन्द्रस्य अपरं नाम किम् ?
4. नाट्यशास्त्रे कति अध्यायाः सन्ति ?
5. नाट्यगृहस्य कति प्रकाराः दृश्यन्ते ?
6. अभिनवगुप्तस्य नाट्यशास्त्रस्य भाष्यस्य नाम किम् ?
7. दशरूपकस्य प्रणेता कोऽस्ति ?
8. अर्थप्रकृतयः कति ?
9. सन्धयः कति भवन्ति ?
10. पताकास्थानकस्य किं लक्षणम् ?

अधस्तनेषु पञ्चानां व्याख्या विधेया – 6×5=30

11. न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला ।
    नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते ॥
12. कुशला ये विदग्धाश्च प्रगल्भाश्च जितश्रमाः ।
    तेष्वयं नाट्यसंज्ञो हि वेदः सङ्क्राम्यतां त्वया ॥
13. प्रेक्षागृहाणां सर्वेषां प्रशस्तं मध्यमं स्मृतम् ।
    तत्र पाठ्यं च गेयं च सुखश्राव्यतरं भवेत् ॥
14. वेदोपवेदैः सम्बद्धो नाट्यवेदो महात्मना ।
    एवं भगवता सृष्टो ब्रह्मणा सर्ववेदिना ॥

15. नाटकं सप्रकरणं भाणः प्रहसनं डिमः ।
व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति ॥
16. अधिकारः फलस्वाम्यमधिकारी च तत्प्रभुः ।
तन्निर्वृत्तमभिव्यापि वृत्तं स्यादाधिकारिकम् ॥
17. अवस्थाः पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः ।
आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः ॥

निम्नोक्तप्रश्नेषु चतुर्णामुत्तरं प्रदेयम् – 10×4=40

18. नाट्यशास्त्रस्य प्रथमाध्यायस्य कथावस्तु समासेन सरलसुरगिरा उपस्थाप्यताम् ।
19. रङ्गशालाया: स्तम्भस्थापनकार्यं नाट्यशास्त्रानुसारेण प्रतिपादयत ।
20. नाट्यशास्त्रदिशा नाट्योत्पत्तेः विवरणं प्रदेयम् ।
21. दशरूपककारस्य धनञ्जयस्य परिचयो देयः ।
22. पताकास्थानकस्य परिचयो देयः ।
23. अवस्थाऽर्थप्रकृतयोर्भेदः सयुक्तिकं विवेचनीयः ।

****